THE INSTITUTE FOR ADVANCED STUDIES OF WORLD RELIGIONS

FILM—STRIP NO.

MBB—1971—66—27



BUDDHIST SANSKRIT MANUSCRIPTS

LASWER

MICROFILM PROJECT NEB 11

MBR-1972-65 — 16

1. Film strip number — 2. Source

SĀMĀNYAVIVECANA

3. Title

4. Additional title, shortened forms of title etc.

N. S. + 880 = A. D. — X

5. Year in which MS was copied (Nepali Samvat and Christian Era) — 6. Name ofscribe

NEPĀLĪ PAPER — DEVANĀGARĪ

7. Material (palm leaf, etc.) — 8. Script

30 cm x 9 cm — 6

9. Size — 10. Lines to a page

29 — X

11. Number of leaves in complete work — 12. Missing leaves

2 X — X

13. Author and Date of composition (if given) — 14. Number of Chapters

The text of Logic dealing Abhāva

15. Remarks

NOV. 13, 1972

Date photographed

गणेशायनमः॥ अथयद्रूपावच्छिन्नविषयतासमानाधिकरणाभावप्रतियोगितावच्छेदकंयद्रूपावच्छिन्नवि
षयतात्वंतद्रूपावच्छिन्नविषयताशून्यत्वनिवेशेअभावत्वेनकृदत्वावगाहिअभाववानवह्न्यभाववानइत्या
दिज्ञानवारणमशक्यं अभावत्वावच्छिन्नविषयतात्वस्यवह्न्यभाववत्कृदविषयत्वसमानाधिकरणाभाव
प्रतियोगितानवच्छेदकत्वात् यद्रूपावच्छेनाभावत्वस्यधर्म्मस्याशक्यत्वात् वह्न्यभावस्यतादृशविषयित्वसमा
नाधिकरणाभावप्रतियोगितावच्छेदकतद्रूपावच्छिन्नविषयतानिरूपितद्रूपावच्छिन्नविषयतायाशून्य
त्वंनिवेश्यतत्तथाचाभावत्वावच्छिन्नविषयितानिरूपितवह्न्यभाववत्कृदविषयतात्वंतथाचतादृशविषयि

नाधुन्यत्वं तत्र नालीनिष्ठाभावे अभावत्वावच्छिन्नविषयतानिरूपितवह्न्यभाववद्वृत्तित्वावच्छिन्नविषयतायाः
अधिवह्न्यभाववद्वृत्तित्वविशिष्टविषयितात्वाव्यापकत्वात् यदिवयद्रूपावच्छिन्नविषयतात्वावच्छिन्ननिरूपि
तयद्रूपावच्छिन्नविषयतात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकंतद्रूपा
वच्छिन्नविषयितात्वावच्छिन्ननिरूपितं तद्रूपावच्छिन्नविषयितात्वावच्छिन्नाभावत्वन्नदोषः तत्रैवह्न्यभावावच्छि
न्नविषयितात्वावच्छिन्ननिरूपितत्वं नवह्न्यभाववान्हृदत्वानिष्ठज्ञानीयाभावावच्छिन्नविषयितात्वं यो
किन्तुअभावान्नवह्न्यभाववान्हृदइतिज्ञानस्यवह्नितत्सामानाधिकरण्यप्रतीतौतादृशीप्रतीत्यभावादाव

व्याप्तिविरहेणासामान्याधिकरण्यव्यावृत्त्यसङ्गतिः नवाभावत्वमात्रावच्छिन्नविषयितानिरूपितवह्न्यभावत्वावच्छिन्नाधिकरणत्वात् तद्धूमत्वाभावाधिकरणसंगतिरिति वाच्यं तथापि वह्न्यभावत्वावगाहिभ्रमवारणासंभवात् नवभ्रमान्यत्वविशेषणं देयमिति वाच्यं एतत्कल्पेनाप्यप्रयोजकत्वात् नवयत्किंचिदवच्छिन्नविषयितानिरूपितत्वयत्किंचिन्निष्ठावच्छेदकत्वंयत्किंचिद्वृत्तिधर्म्मानवच्छिन्नंग्राह्यमिति वाच्यं • तथापि प्रकारीभूतवह्न्यवच्छिन्नाभावत्वेन ज्ञानवारणासम्भवात् नवह्नादृशविषयितात्वंतादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकंतादृशविषयतात्वावच्छिन्नाभावत्वंविशेषणंदेयमिति वाच्यंव

सा.मा. त्वावच्छिन्नविषयतानिरूपितऋत्वावच्छिन्नविषयतानिरूपितअभावत्वावच्छिन्न[redacted]विषयतात्वा
दिरूपस्यतादृशविषयितात्वस्यतादृशविषयकत्वसमानाधिकरणाभावप्रतियोगितायाश्छेदकतावच्छेदकसंबन्ध
तत्रज्ञानान्यत्वेनस्वतंत्रविशेषणत्वापिदेयत्वात् त्वाभाववन्निष्ठविशेष्यतानिरूपितनिष्ठप्रकारताकत्वत्वाश्रय
निष्ठविशेष्यतानिरूपितनिष्ठप्रकारताकत्वोभयसम्बन्धेनकिञ्चिद्धर्मविशिष्टज्ञानान्यत्वंदेयमितिकथंचिदु
दनुगमोक्तिसंभवात्रवक्तुं अथैवंज्ञानिमानवह्नभाववान इत्यादिग्रंथतयापाततः विषयितासम्बंधेनया ७८
दृशविशिष्टव्यापकंप्रतिबंधकत्वं तादृशत्वमित्यवक्तव्यंयत्रस्वरूपतोऽस्वरूपतोवायादृशविशेषणघटि

योग्यादृशविशिष्टो दोषः तत्रतादृशविशिष्टनिरूपितविषयतायास्तादृशविशिष्टस्यसंसर्गतात्वीक्रियते
तन्नव्यविधयोरनिज्ञानिमहछिभावँ [redacted] विशिष्टनिरूपितविषयितायाः सुरूपतोऽनुत्वघटितविशिष्टस्य
संसर्गतायाविरहेणासंभवाभावात् परंतुयादृशत्वमनुगतमितिनिष्टेनाभावत्वेनऽनुत्वावगाहिज्ञानवारणाय
थार्थपदमार्थक्यसंभवेनदीधितिकृतायथार्थपदाघटितद्वितीयलक्षणाभावस्यविवेधइतिवोलवः।अतएव
वाऽनुमितियथार्थानर्थगन्धेवभवत्वार्थ्यांशविशिष्टाप्रिप्रसिद्धस्थले अनुमितौविषयतामनुपादायविष
यितासम्बन्धेनविशिष्टविषयस्यैवज्ञानेनिवेशकृतः। अथयद्यपिविषयितासामान्यमनुमितिप्रतिवं

सामा इदमवच्छिन्नविषयतात्वं यादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तत्संसर्गावच्छि
न्नतदूपावच्छिन्नविषयितान्यत्वस्य ज्ञानेविशेषत्वात् वाणसम्भवात् गोत्वाभावत्वविशिष्टविषयकत्वसमाना
धिकरणाभावप्रतियोगितावच्छेदकं समवायसंसर्गावच्छिन्नगोत्वावच्छिन्नविषयितात्वं गोत्वाभावज्ञानेप्रति
योगितासंबन्धेनगोत्वभानात् तथाच तदूपावच्छिन्नसमवायसंसर्गावच्छिन्नविषयिताऽन्यत्वगोत्वाभावो गोत्वव्या
प्तिज्ञानेऽपीतितत्रातिव्याप्तिरितिवाच्यं तथासत्यपिगोत्ववत्यपिगोत्ववत्समानकालीनगोत्वाभावपक्षक उक्तः
स्थलेनादृशगोत्वाभावेऽतिव्याप्तेः इत्थंचयथाश्रुतापिप्रायेणगोत्वाभाववन्निष्ठेत्यादिविशेषणदानेवनसंभव

तीतिबोधं जातिमज्जातित्वावच्छिन्नविशेष्यतायाः संसर्गावच्छिन्नतया संसर्गनिवेशे जातिमानजातिमानिति
ऊदोऽत्यभावप्रतियोगित्वादौ ज्ञानकारणसंभवाच्च स्वरूपावच्छिन्नविषयकत्वसमधिकरणाभावप्रतियोगित्व
वच्छेदकं यद्रूपावच्छिन्नसंसर्गकविषयतानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशरूपावच्छिन्नसांसर्गिकवि
षयतानिरूपिततद्रूपावच्छिन्नविषयितात्वन्यत्वं तस्य तादृशज्ञानेऽसत्वादिति वाच्यं यत्र स्वरूपसम्बन्धेगोत्वाभा
वेगोत्वस्यभ्रमः तत्रगोत्वाभावत्वस्यापि स्वरूपसम्बन्धेनभानात् स्वरूपविषयितानिरूपितगोत्वाभावत्वा
वच्छिन्नविषयितात्वस्यानथात्वेन स्वरूपविषयितानिरूपितगोत्वावच्छिन्नविषयितात्वस्यापि यावत्थात्वे

सामा

धकतावच्छेदकसिन्नेशसामान्यपदव्यर्थकदोषतुल्यभावत्वमितिज्ञानीयकरत्वावच्छिन्नयत्किंविधिषयितायाः स्व
रूपसंबन्धरूपावच्छेदकत्वेपितज्ञानस्यकरत्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेद
कयद्रूपभावत्वावच्छिन्नविषयितात्वतद्रूपावच्छिन्नविषयिताभूयस्त्वाभावादेववारणसंभवात् करइत्याका
रकज्ञानीयविषयितायाश्चस्वरूपसम्बन्धैकरूपावच्छेदकत्वविरहात् नवह्निसदृशाव्यापकविषयिताभूयस्त्वं न
तिविशेषवह्निभावज्ञानिसत्वावच्छिन्नविषयितायाःपिस्वरूपसम्बंधरूपावच्छेदकत्वात् इतिमानवह्निभावाभा
वितिज्ञानकालीनस्य ज्ञानिमानकरइतिज्ञानस्यकरेवप्रमितिप्रतिबंधकत्वादितिवाच्यं तावतोपिकरत्व

उक्तं

समाधिकरणेन वह्न्यभावस्यादोषतापत्तेः तत्र ज्ञानिसमानाधिकरणेन वह्न्यभावविषयितायाः स्वरूपसं
बंधरूपावच्छेदकत्वविरहेण तादृशाव्याप्यकविषयितासम्बन्धस्य शक्यत्वात् नवसंयोगः संयोगवान् इ
त्याकारकभ्रमात्मकबाधज्ञानविषये व्याप्तिः तत्रसंयोगत्वावच्छिन्नविषयितात्वस्य तादृशतया तादृशविषयि
तासम्बन्धस्य संयोगवानितिभ्रमेसत्वादितिचेन्न गोत्वाभावोगोत्वाभाववान् इत्यादौ गोत्वाभावोगोत्वावा
न् इत्याकारकभ्रमात्मकबाधज्ञानविषयगोत्वाभावेतिव्याप्तेस्तत्रगोत्वाभावत्वविशिष्टविषयकत्वसमा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य गोत्वावच्छिन्नविषयितात्वस्य सत्वात् नवयत्संसर्गावच्छिन्नय

गोत्वाभावो गोत्वत्वानिति भ्रमविषये तादृशधर्मेति व्याप्तिः नवयङ्घटावच्छिन्न [illegible] विशेष्यतात्वे तादृशविशि
ष्टविषयत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तादृशबुध्यविशेष्यताश्रयत्वं विशेषणत्वेनतत्र न
देयः गोत्वाभावत्वावच्छिन्नबुध्यविशेष्यतात्वस्य गोत्वाभाववत्वानिति ज्ञानेतिव्याप्तिप्रतियोगितावच्छेदकत्वा
न्तदवच्छिन्नबुध्यविशेष्यताश्रयत्वं तत्र प्रतिबंधकीभूतज्ञानेसत्वादितिवाच्यं तथाप्यसंभवापत्तेरुक्तो
वह्निभाववत्वानितिज्ञानस्यसंग्रहासंभवात् तादृशविशिष्टनिरूपितबुध्यविशेष्यताश्रयत्वाभावात् नवयवह्नि ७८:
भाववह्रदादावतिव्याप्तिज्ञानमादायलक्षणसमन्वयादितिवाच्यं वह्निभाववह्रदावच्छिन्नविशेष्यतात्व

तादृशज्ञानत्वावच्छिन्नत्वञ्च विशेष्यतानाश्रयत्वत्वयतादृशज्ञानेभावात् वस्तुतस्तूभयरूपावच्छिन्नविषयितात्वमित्या
दिविशेषणमध्येसंसर्गनिवेशेप्रयोजनांतराभावेनसामान्यप्रकारेणैव कारणात् यथासंनिवेशेवैयर्थ्याभावा
दितिरूपेणयद्रूपावच्छिन्नविषयिताकावच्छिन्ननिरूपितयद्रूपावच्छिन्नविषयितात्वंवोद्धव्यं तेनाभावनिवेशेया
दृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकंतद्रूपावच्छिन्नविषयितात्वावच्छिन्ना
भावनिवेशनेदोषः गोत्वाभावत्वावच्छिन्नविषयितात्वावच्छिन्ननिरूपितत्वस्यागोत्वाभावेगोत्वज्ञानेनिमित्ता
नेगोत्वाभावत्वावच्छिन्नविषयितात्वावच्छिन्ननिरूपितगोत्वत्वावच्छेदेपिविषयिताशून्यत्वाभावात् अर्थं

सामा

सामान्यदर्शनविषयासं॥ यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं अनुमितिप्रतिबंधकतानिरूकवृत्तिताद्दशविशिष्टद्वयावच्छिन्नत्वात वह्न्यभावत्वकुद्दादावसंभवः परस्परं यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबंधकतानिरूकवृत्तिताद्दशविशिष्टद्वयावच्छिन्नत्वेनिवेशनीयनदोषइतिवाच्यं तथासत्यपिवह्न्यभाववत्कुद्दत्वविशिष्टविषयकनिश्चयविशिष्टवह्न्यभाववत्कुद्दत्वविशिष्टविषयकनिश्चयत्वस्यापि अनुमितिप्रतिबंधकतानिरूकवृत्तित्वात् ताद्दशविशिष्टद्वयावच्छिन्नत्वस्यवाधौसत्वेनासंभवादिति चेन्न यादृशविषयकनिश्चयविशिष्ट यादृशविशिष्टविषयकनिश्चयत्वं ज्ञानवै

शिष्यावच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिताद्यविशिष्टद्वयापरित्वस्यनिवेशनीयत्वात् अथैवमपि बहूनां
ववह्नलादिमद्भिन्नजलाभाववद्भूदपक्षकस्थलेतादृशावह्न्यात्मकाश्रयसिद्धावव्याप्तेश्चतादृशविशिष्ट
यद्यपित्वात् नाश्रयासिद्धिः विषयतापक्षकविषयतासम्बन्धत्वं तादृशविशिष्टद्वयापरित्वं निवेश्यमि
तिचेत् तथासतितादृशीत्यासाध्यप्रसिद्धावव्याप्तिवारणाय श्राश्रयासिद्धिसाध्याप्रसिद्धिविषयतापक्ष
विषयितासम्बन्धत्वस्यापिनिवेशनियतयागौरवात् ग्रंथकारस्यसत्प्रतिपक्षपक्षकविषयितासम्बन्धत्वमात्र
निवेशनाशौचित्यात् नचयादृशविशिष्टनिश्चयत्वंज्ञानविशिष्टज्ञानवच्छिन्नंप्रतिबंधकतानतिरिक्तवृत्तिता

सामा सत्यां तत्राभ्याप्तिः ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतामादायैव विशिष्टज्ञानरा घटितत्वसंभवात् तत्त्वसंभवात्
तस्मादाश्रयासिद्ध्यादिविषयित्वाघटकत्वमेव विशिष्टद्वयविषयितायां निवेश्यतीयं अथयादृशविशिष्ट
विषयकनिश्चयत्वं ज्ञानवैशिष्ट्यावच्छिन्नानुमितिप्रतिबंधकतानतिरिक्तवृत्तिर्तादृशविशिष्टघटितत्वमेव वि
शेषणतावच्छेदकविशिष्टद्वयाघटितत्वनिवेशनेनेति अत्रकेचित् ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकता लाभायतादृशविशि
ष्टद्वयाभिधानं परंतुयादृशयदनवच्छेदकभावव ज्जलादिमद्वह्नित्वजलवह्नादेरिवयद्भावज्ञानित्वाकालीनज ग्रतः
नवह्नादेरनुपादेयत्वतयातादृशानुविशिष्टाघटितत्वमपेक्षतेयदघटकविशिष्टद्वयसमुदायतादृशवि

शिष्टपदार्थवारणमेवमग्रेऽपि बोध्यं। लाघवेनानुगमोक्तिः। नवतादृशविशिष्टव्याप्यत्वकल्पनौचित्यात्
वह्नभाववज्जलादिमत् स्वरूपविशिष्टविषयकनिश्चयविशिष्टकालीनत्वविशिष्टजनकत्वं तादृशविशिष्टविषय
कनिश्चयत्वाश्रयेतरादृशप्रतिबंधकतावच्छेदकतया तादृशविशिष्टव्याप्यत्वनिवेशगौरवमिति
वाच्यं। व्याप्यविशिष्टविषयकनिश्चयविशिष्टव्याप्यविशिष्टविषयकनिश्चयतावच्छिन्नप्रतिबन्धकता
याः तादृशव्याप्यत्वात् वह्नभाववज्जलवत् निश्चयविशिष्टकालीनविशिष्टजनकत्वं किंतु निश्चयत्वेना
प्रतिबंधकतयातादृशस्वरूपस्योपादानासंभवात् नवतादृशविशिष्टविषयकनिश्चयविशिष्टनिश्चयनि

दृश्यविशिष्टकविषयतानिरूपितत्वंतादृशविशिष्टद्वयेनिवेशनीयमितिनदोषइतिवाच्यं तथासतिवह्न्यभाववज्जला
दिमहत्त्वज्जलाभाववद्धूमदृश्यकस्थलेवह्न्यभाववज्जलवाकालीनजनवह्न्यादेरपिदोषतायत्नेःविशिष्टपक्षस्य
हाविरोधिनयानत्याश्रयासिद्धत्वाभावादितिवेन्नयादृशविशिष्टविषयकनिश्चयत्वंज्ञानवैशिष्ट्यावच्छिन्नंप्रति
बंधकतानिरूक्तवृत्तिनादृशविशिष्टविषयतायाश्चकाविषयितानिरूपितत्वस्यनिरूक्तविशिष्टद्वयविषयितायां
निवेशनीयत्वात् एवंचविशिष्टद्वयाघटितत्वशरीरेसंभवतीत्यप्रतिबंधकतायांनिवैशिष्ट्यंयत्नात्तु ह्या
नवच्छिन्नंप्रतिबन्धकतावच्छेदकतयातादृशविशिष्टविषयितानिरूपितत्वस्यनिरूक्तविशिष्टद्वयविषयितायाम

नाभावात् वह्नितत्कालाद्यवच्छिन्न विशिष्टहृदाद्यधिकरणत्वशरीरज्ञानवैशिष्ट्यावच्छिन्न प्रतिबंधकतावच्छेदकवि
शेषणीभूतत्वमेवतादृशविशिष्टहृदाद्यधिकरणायांनिवेशनीयमिति नकोपिदोषइति अत्रेदंबोध्यम्॥ह्रदोवह्नि
मान्वह्निमत्त्वज्ञानवत्कालीनत्वाभाववद्ह्रदादित्वादौवह्न्यभाववत्त्वज्ञानादिमहत्तिजलवद्ह्रदादेरनित्यो
पस्थितत्वज्ञानवैशिष्ट्यावच्छिन्नंयद्धेतुग्रहप्रतिबंधकत्वंतदवच्छेदकविषयितासंबंधेनतत्तद्विशिष्टहृदयवि
षयित्वं नतुन्यप्रतीतिविषयित्वस्यतादृशविशिष्टत्वात् नचतत्तादृशविशिष्टंनरंयज्ज्ञानवद्ह्रदादिनदृष्ट
पित्वान्नित्यास्मृतिरितिवाच्यं विशेषणवृत्यादिसंग्रहायाग्रेवक्ष्यमाणस्य यत्किञ्चित्प्रतिबंधकतायाश्चनि

सामा

दृश्यानादृशविषयितासामान्येऽनुमितिप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेनैवोपप
त्तौविशिष्टदृश्यघटितत्वशरीरेऽनतिरिक्तवृत्तित्वविशेषणव्यर्थमितिमाथुरपक्षवृत्तिजनमितिनिश्चयविशि
ष्टवह्निव्याप्यीभूतभावप्रतियोगित्वविशिष्टहेतुनिश्चयत्वेनप्रतिबंधकतायाजनत्वविशिष्टविशिष्टविषय
कनिश्चयविशिष्टनिश्चयनिष्ठवह्निव्याप्यीभूताप्रतियोगित्वविशिष्टहेतुरूपविशिष्टविषयितायाःस्वरूपसं
बंधरूपावच्छेदकत्वेजलत्वविशिष्टजलरूपविशिष्टवह्निव्याप्यीभूताभावप्रतियोगित्वविशिष्टहेतुरूपविशि ७८:
ष्टदृश्यघटितत्वेनासाधारणव्याप्तिवारणायनसार्थकमान अथयादृशविशिष्टविषयकनिश्चयविशिष्ट